संस्कृतवार्ताः

24.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

· आर्थिक-प्रकरणानां मन्त्रिमण्डलीय-समित्या अष्टनवत्यधिक-सप्तशतोत्तर-षड्सहस्रकोटि-रुप्यकाणां द्वाभ्यां रेलपरियोजनाभ्यां स्वीकृतिः प्रदत्ता।

· दाना इति चक्रवातस्य अद्य रात्रौ ओडिशातटस्थ भीतरकनिका-धामरा क्षेत्रयोः मध्ये प्रवेशः संभाव्यते । चक्रवातप्रभावेण ओडिशा-पश्चिमवङ्गयोः विभिन्नजनपदेषु महती वृष्टिः अपि भवितुमर्हति।

· जर्मनदेशीयः कुलाधिपतिः ओलाफ-शोल्ज इत्येषः अद्यारभ्य दिनत्रयं यावत् भारतस्य यात्रायाम् आयाति।

· अद्य प्रातः अल्बानियादेशस्य तिरानानगरे अन्तर्त्रयोविंशतिवर्षीयाणां विश्वचैम्पियनशिप इति मुष्टामुष्टि-प्रतियोगितायां भारतस्य विश्वजीतरामचन्द्र मोरे इत्यनेन कांस्यपदकं विजितम्।

<u>सीसीईए-परियोजनाः</u>

आर्थिक-प्रकरणानां मन्त्रिमण्डलीय-समित्या अष्टनवत्यधिक-सप्तशतोत्तर-षड्सहस्रकोटि-रुप्यकाणां द्वाभ्यां रेलपरियोजनाभ्यां कृते स्वीकृतिः प्रदत्ता। प्रथम-परियोजनायां नरकटियागंजतः रक्सौल-सीतामढ़ी-दरभंगापर्यन्तं रेलवे-संपर्कतायाः द्विविधीकरणं जातं तथैव सीतामढ़ी-मुजफ्फरपुरखण्डौ अपि तत्र सम्मिलितौ स्तः। अयं मार्गः षड्-पञ्चाशदधिक-द्विशत किलोमीटर परिमितं विस्तृतः वर्तते।

इयं परियोजना नेपालपूर्वोत्तरभारतयोः सहैव सीमवर्तीक्षेत्रेषु च संपर्कतां दृढीकरिष्यति। अनेन यात्रिणां कृते गमनागमनं सुकरं भविष्यति तथैव क्षेत्रस्य सामाजिकार्थिक-विकासः अपि भवति। केन्द्रीय-मन्त्रिमण्डलस्य उपवेशनानन्तरं नवदिल्ल्यां वार्ताहरान् विज्ञापयन् सूचना एवं प्रसारणमन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् सी. सी. ई. ए. इत्यनेन अमरावती-माध्यमेन एर्रुपलम-नम्बुरु इत्यनयोः मध्ये नूतनाय-रेलसंपर्काय स्वीकृतिः प्रदत्तास्ति। अस्य विस्तारस्तावत् सप्तपञ्चाशत् किलोमीटर-यावत् भविष्यति।

दाना-चक्रवात:

पूर्व-मध्य-बङ्ग-खात्यां सञ्जातः 'दाना' इति तीव्रचक्रवातः ओडिशा एवं पश्चिमबङ्ग-तटं प्रति गच्छति। चक्रवातः ओडिशायाः पुरीतः एवं पश्चिमबङ्गस्थ सागरद्वीपस्य च मध्यभागात् प्रस्थास्यति । दाना इति चक्रवातस्य अद्य रात्रौ ओडिशातटस्थ भीतरकनिका -धामरा क्षेत्रयो: मध्ये स्थिति: संभाव्यते । चक्रवातप्रभावेण ओडिशा-पश्चिमवङ्गयो: विभिन्नजनपदेषु महती वृष्टि: अपि भवितुमर्हति। भारतस्य ऋतुविभागेन चक्रवातस्य स्थलप्रवेशस्य समये प्रतिहोरा शततः विंशत्यधिकैकशतं कि.मी. परिमितं यावत् वायुवेगः भविष्यति इत्यनुमितम्।, स्थलप्रवेशप्रक्रिया श्वः प्रातःपर्यन्तं निरन्तरं भविष्यति, यस्य प्रभावः अस्मिन् क्षेत्रे व्यापकः भविष्यति। दाना-चक्रवातस्य कारणेन अद्य पश्चिमबङ्ग-ओडिशा-राज्ययोः अनेकेषु मण्डलेषु प्रचण्डवृष्टिकारणात् ऋतुविभागेन रक्तवार्णिकी सञ्चेतना प्रसारितास्ति। आईएमडी इत्यस्य ऋतुविभागस्य महानिदेशकः डॉ मृत्युंजय महापात्रा आकाशवाण्या सह वार्तालापं कुर्वन् अवदत् यत् चक्रवातस्य प्रभावेण अस्मिन् क्षेत्रे वर्षा समारब्धा अस्ति, वर्षा आगामिषु चतुर्विंशतिहोरासु वर्धते। ओडिशा-तटीयक्षेत्रेषु निम्नक्षेत्रेषु च निवसन्तः जनाः बहु-उद्देश्यकचक्रवातकेन्द्रेषु स्थानान्तरिताः भवन्ति। पश्चिमबङ्गसर्वकारेण अपि प्राणानां सम्पत्तिनां च रक्षणाय सर्वाः सज्जताः कृताः सन्ति। राज्ये तटीयक्षेत्रेषु निवसन्तां जनानां निष्कासनं क्रियते। सुन्दरबन्- सागरद्वीपयोः अन्येषु च भागेषु नौकायानसेवाः स्थगिताः सन्ति। कोलकातां समेत्य सर्वेषु मण्डलेषु आपत्विमोचन-दलानि नियोजितानि सन्ति । पश्चिमबङ्गतटे मत्स्यजीविभ्यः सञ्चेतना प्रदत्ता अस्ति यत् यावत् स्थितिः सामान्या न भविष्यति तावत् समुद्रे उद्यमं न कुर्वन्तु। ओडिशा-राज्यस्य भुवनेश्वरस्य बीजु-पटनायक-अन्तर्राष्ट्रीय-विमानस्थानके आवागमनार्थं सर्वाणि विमानयानानि अद्य सायं पञ्च वादनात् श्वः प्रातः नववादनपर्यन्तं निरस्तीकृतानि सन्ति, तत्रैव बहुशः रेलयानानि अपि निरस्तीकृतानि सन्ति। अस्मिन् क्षेत्रे एतावता चत्वारिंशततोऽप्यधिकाः विमानसेवाः, द्वि शततोप्यधिकानि रेलयानानि च निरस्तीकृतानि सन्ति । अस्मिन्नेव क्रमे भारतीयनौसेना मानवीयसहायता तथा आपत्मोचन (HADR) कार्याणि सम्पादयितुं सन्नधौ स्तः। रक्षामन्त्रालयेन विज्ञप्तौ उक्तं यत् संभाव्य प्रभावित क्षेत्राणां कृते अस्य सज्जतायाः अंशरूपेण एचएडीआर-दलानि, वस्त्राणि, पेयजलं, खाद्यं, औषधं, आपत्कालीन-साहाय्य सामग्र्य: च समाविष्टाः सन्ति। भारतीयतटरक्षकदलं अपि स्थितिं निकटतया निरीक्षते, चक्रवातस्य प्रभावात् उत्पद्यमानां आपत्स्थितिं सम्मुखीकर्तुं सक्रियपदक्षेपाः संधारिताः।

जर्मन-ओलाफ-शोल्ज:

जर्मनदेशीय: कुलाधिपति: ओलाफ-शोल्ज इत्येष: अद्यारभ्य दिनत्रयं यावत् भारतस्य यात्रायाम् आयाति। अत्रावसरे श्रीशोल्जइत्येष: सप्तमे अन्तासर्वकारीय-परामर्श-समूहे भागं स्वीकरिष्यति। प्रधानमन्त्री नरेन्द्रमोदी श्री शोल्ज: च शुक्रवासरे अस्य समूहस्य उपवेशनस्य सहाध्यक्षतां करिष्यत:। समूहोऽयं एका सर्वकारीयव्यवस्थास्ति, यस्यान्तर्गतं उभयो: पक्षयो: मन्त्रिण: निजाधिकार-क्षेत्रेषु विचारविमर्शं विधास्यन्ति अपि च निष्कर्षस्य प्रतिवेदनानि प्रधानमन्त्रिणे कुलाधिपतये च प्रस्तुवन्ति।

गडकरी-मार्गसुरक्षा

राष्ट्रिय-राजमार्ग-परिवहनमन्त्री नितिन गडकरी इत्येषः प्रोक्तवान् यत् सर्वकारीय-मार्गसुरक्षा-पारिस्थितिकी-तन्त्रे कृत्तिमबुद्धिमत्ता-सदृशानां सर्वासां उन्नतप्रविधीनां कार्यान्वयनं क्रियते। अद्य नवदिल्ल्यां ट्रैफिक-इंफ्राटेक-एक्सपो इत्यस्य द्वादशतमं संस्करणं सम्बोधयन् सः मार्गनिर्माणे उन्नतप्रविधेः प्रयोगाय बलं दत्तवान्। तेन प्रोक्तं यत् सर्वकारः प्रतिभाशालि-अभियन्तृन् प्रोत्साहयति येन चालकानां कृते मार्गाः सुरक्षायुताः स्युः।

प्रधानमन्त्री-ITBP:

अद्य भारत-तिब्बत सीम्नि आरक्षिदलस्य (ITBP) इत्यस्य स्थापनादिवसः आचर्यते। अस्मिन् अवसरे स्वस्य सन्देशे प्रधानमन्त्री नरेन्द्रमोदी ITBP हिमवीरेभ्यः तेषां परिवारेभ्यश्च अभिवादनं कृतवान् । एकस्मिन् सामाजिक-संजालीय-सन्देशे श्रीमोदी अवदत् यत् आईटीबीपी शौर्यस्य, समर्पणस्य प्रतीकत्वेन जनानां रक्षणाय च सदैव तत्परः अस्ति। सः प्राकृतिकापदुद्धरणकार्याणां कृते तेषां प्रयत्नानां प्रशंसाम् अपि अकरोत् ।

मुष्टामुष्टि- कांस्यपदकम्

अद्य प्रातः अल्बानियादेशस्य तिरानानगरे अन्तर्त्रयोविंशतिवर्षीयाणां विश्वचैम्पियनशिप इति मुष्टामुष्टि प्रतियोगितायां भारतस्य विश्वजीतरामचन्द्र मोरे इत्यनेन कांस्यपदकं विजितम्। पुरुषाणां पञ्चपञ्चाशत् किलोग्राम-भारयुतस्य ग्रेको - रोमन इति वर्गे एडम् उल्बाशेवं चतुर्दश-दश इत्यांकान्तरालेन पराजितम् । अस्मिन् चॅम्पियनशिप्-क्रीडायां भारतस्य एतत् प्रथमं पदकम् अस्ति । इरानस्य अली अब्दुल्लाह् अह्मदी वाफा इत्यनेन स्वर्णं, रशद मम्मादोवेन रजतपदकं, जापानस्य कोहेल् यामागिवा विश्वजित रामचन्द्र मोरे इत्युभौ कांस्यपदकं प्राप्तवन्तौ।

।।इति वार्ता:।।